योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः २४

चतुर्विंशः सर्गः २४

श्रीवसिष्ठ उवाच ।

महानरकसाम्राज्ये मत्तदुष्कृतवारणाः ।

आशाशरशलाकाढ्या दुर्जया हीन्द्रियारयः ।। १

स्वाश्रयं प्रथमं देहं कृतघ्ना नाशयन्ति ये ।

ते कुकार्यमहाकोशा दुर्जयाः स्वेन्द्रियारयः ।। २

कलेवरालयं प्राप्य विषयामिषगृध्नुकाः ।

अक्षगृध्रा विवल्गन्ति कार्याकार्योग्रपक्षिणः ।। ३

विवेकतन्तुजालेन गृहीता येन ते शठाः ।

तस्याङ्गानि न लुम्पन्ति पाशा नागबलं यथा ।। ४

आपातरमणीयेषु रमते विषयेषु यः ।

विवेकधनवानस्मिन्कुकलेवरपत्तने ।। ५

इन्द्रियारिभिरन्तस्थैरवशो नाभिभूयते ।

न तथा सुखिता भूपा मृन्मयोग्रपुरीजुषः ।। ६

यथा स्वाधीनमनसः स्वशरीरपुरीश्वराः ।

आक्रान्तेन्द्रियभृत्यस्य सुगृहीतमनोरिपोः ।। ७

वसन्त इव मञ्जर्यो वर्धन्ते शुद्धबुद्धयः ।

प्रक्षीणचित्तदर्पस्य निगृहीतेन्द्रियद्विषः ।। ८

पद्मिन्य इव हेमन्ते क्षीयन्ते भोगवासनाः ।

तावन्निशीथवेताला वल्गन्ति हृदि वासनाः ।। ९

एकतत्त्वदृढाभ्यासाद्यावन्न विजितं मनः ।

भृत्योऽभिमतकर्तृत्वान्मन्त्री सत्कार्यकारणात् ।। १०

सामन्तश्चेन्द्रियाक्रान्तेर्मनो मन्ये विवेकिनः ।

लालनात्स्निग्धललना पालनात्पावनः पिता ।। ११

सुहृदुत्तमविश्वासान्मनो मन्ये मनीषिणाम् ।

स्वालोकितः शास्त्रदृशा बुद्ध्यान्तः स्वानुभावितः।।१२

प्रयच्छति परां सिद्धिं त्यक्त्वात्मानं मनःपिता ।

सुदृष्टः सुपरामृष्टः सुदृढः सुप्रबोधितः ।। १३

सुगुणे योजितो भाति हृदि हृद्यो मनोमणिः ।

जन्मवृक्षकुठाराणि तथोदर्कोदयानि च ।। १४

दिशत्येवं मनोमन्त्री कर्माणि शुभकर्मणि ।

एवं मनोमणिं राम बहुपङ्ककलङ्कितम् ।। १५

विवेकवारिणा सिद्ध्यै प्रक्षाल्यालोकवान्भव ।

भवभूमिषु भीमासु विवेकविकलो वसन् ।। १६

मा पतोत्पातपूर्णासु विवशः प्राकृतो यथा ।

संसारमायामुदितामनर्थशतसंकुलाम् ।। १७

मा महामोहमिहिकामिमां त्वमवधीरय ।

विवेकं परमाश्रित्य बुद्ध्या सत्यमवेक्ष्य च ।। १८

इन्द्रियारीनलं जित्वा तीर्णो भव भवार्णवात् ।

असत्येव शरीरेऽस्मिन्सुखदुःखेष्वसत्सु च ।। १९

दामव्यालकटन्यायो मा ते भवतु राघव ।

भीमभासदृढस्थित्या त्वं यास्यसि विशोकताम् ।। २०

अयमहमिति निश्चयो वृथा य-

स्तमलमपास्य महामते स्वबुद्ध्या ।

यदितरदवलम्ब्य तत्पदं त्वं

व्रज पिब भुङ्क्ष्व न बध्यसे मनस्कः ।। २१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मो. स्थितिप्रकरणे मनस्यसत्ताप्रतिपादनं नाम चतुर्विंशः सर्गः ।। २४ ।।